श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्रीयामुनमुनिस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. R. Thirunarayanan of Srirangam for proofreading this text.

श्रीः

श्रीमते यामुनमुनये नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीयामुनमुनिस्तुतिः ॥

यदुपज्ञ मशेषवैष्णवश्श्रीः
    प्रथिता योगरहस्यविच्च येन।
शठकोपमुनिर्विलोकित स्तं
    विबुधं नाथमुनिं नमामि नित्यम्॥ १ ॥

श्रीमन्नाथमुनेर्बुधोत्तममणेर्योगीश्वरस्यात्मजः
    श्रीमानीश्वरमुन्यभिख्य उदित स्सद्धर्मसंरक्षकः।
योऽस्मत्संस्तवनाश्रयस्य जनक श्श्रीयामुनार्यस्य तं
    प्रख्यातात्मगुणादिसंपदमहं श्रीवैष्णवाग्र्यं भजे॥ २ ॥

श्रीमद्रङ्गाधिनेतुर्निरवधिकदयापात्रभूतेश्वराख्यः
    प्रादुर्भूतः कुमाराकृति रतिसुकृती विश्वविख्यातकीर्तिः।
धातावब्दे कुळीरे बुधदिनमहितेत्उत्तराषाढतारे
    राकायां रङ्गपुर्यां श्रुतिशिखरयुगोल्लासकारी तमीडे॥ ३ ॥

शुक्लपक्षचन्द्रवत् प्रवर्धमाननन्दनं
    युक्तकालकारितद्विजार्हकर्मशोभिनम्।
पाठकोक्तिमात्रलब्धकण्ठपाठपाठिनं
    यामुनं पितामहोक्तनामधारिणं श्रये॥ ४ ॥

महाभाष्यभट्टाभिधानो बुधेन्द्रो
    बभौ सर्वशास्त्रप्रवक्ता स यस्य।
तदानन्यसामान्यशास्त्रोपदेष्टा
    स्तुवेऽतः प्रवीणं मुनिं यामुनं तम्॥ ५ ॥

आस्थान्यां चोळराजः प्रथितबुध उवासाक्कियाळ्वानभिख्यः
    गर्वी चोर्वीबुधेभ्यो तुदति कर मुपादाय तान् भर्त्सयन् स्म।

www.prapatti.com

मेधावी यामुनार्य स्स्वगुरु मपि तथा पीडितं वीक्ष्य रुष्टः
तस्मै दृप्ताय पद्यं नवय मिति कृतं प्रैषयत् तं नमामि॥ ६॥

आकर्ण्यैतां प्रवृत्तिं निजपरिजनतो मान्य आनीयतां द्राक्
सर्वंमन्यं मदीयं जयति यदि तदानन्यसाधारण स्स्यात्।
इत्युक्त्वान्दोलिकाद्यैः यमखिलबिरुदै राट् समानाययत् यः
आशैलादि त्यवादीत् रसमय मभयः पद्यं ईडे गुरुं तम्॥ ७॥

पूर्वं शास्त्रार्थवादात् प्रचलित उभयोर्लौकिके वाक्प्रयोगे
माता ते नैव वन्ध्या मनुजपतिरयं सार्वभौम स्सतीयम्।
ईदृक्प्रश्नत्रयस्य प्रतिवच उचितं यस्य नोचे स विद्वान्
यस्मै राज्यार्ध मुर्वीपति रथ च मुदा दत्त सम्भावये तम्॥ ८॥

आयान्तं प्रतिवीक्ष्य चोळमहिषी प्रोचे मुदा यामुनं
यं कारुण्यपयोधि मात्मगुणिनं पाण्डित्यकल्पद्रुमम्।
किं मां शास्तु मुपागतोऽसि भगवन्नुज्जीवये त्यब्रवीत्
यस्य द्राविडनामतोऽपि चरितं ख्यातं भजे तं गुरुम्॥ ९॥

राजभोगभोगिनं सभार्यमार्ययामुनं
राममिश्र एकदा गुरोर्निदेशतो मुदा।
आत्मसाद्विधातु मेत्य नेक्षितुं शशाक यं
शाकमेकमीप्सितं ददावलर्कनामकम्॥ १०॥

पाचकस्य कस्यचित्करे विपच्य भोजये-
त्यन्वहं तथाशयन्नपीप्सितं यदाप न।
जोष मेकवासरं स्थितोऽथ सूद माह यो
भो ! अलर्कशाकदं प्रदर्शयेति तं भजे॥ ११॥

नृपविभवविलोलो राममिश्रं विवक्षुं
समयविदुपयातं यामुनार्योऽन्वयुङ्क्तः।
अतिशयमहिमा त्वं काङ्क्षसे किं ददानी-
त्यथ किमपि न चाहं किं तु दित्सुः प्रभो ! ते॥ १२॥

आवन् प्रज्ञा मनीषिन् निधिमिव भवतः कञ्चिदर्थं त्वदर्थं
श्रुत्वैवोपैष्यभिज्ञ स्तदवधि सविधं देहि ते मेऽभिवेत्रे।
एवं विज्ञापितो य स्तदनु बहुविधं तेन गीतार्थसारं
विज्ञायात्यन्तहृष्टोऽभवदुपगमितोपाय आभावये तम्॥ १३॥

गीतार्थं सरहस्य माशु बुबुधे श्रीराममिश्राश्रयात्
साक्षात्कार मनन्यबोधसुलभं मोक्षोपकारं यतः।
तस्योपाय मवाप यश्च समये वैराग्यभाग्यो बभौ
श्रीरङ्गेशनिषेवणैकसुमतिर्भूत्वा तं अन्तर्दधे॥ १४॥

परमात्मन्यनुरक्तं प्राकृतविषये विरक्तं आत्मज्ञम्।
परिपक्वचित्तवृत्तिं यामुनयतिचक्रवर्तिनं वन्दे॥ १५॥

पूर्णं महापूर्ण मुखै स्स्वशिष्यैः गुणार्णवैर्यं नियुयोज तूर्णम्।
श्रीराममिश्रः कुरुकाधिपालसूरिं रहस्यार्थमिहीत्ययेतम्॥ १६॥

श्रीराममिश्रगुरु रात्मान्तकाल मभिवीक्ष्यात्मबोधवशिनं
श्रीरङ्ग आस्व बुधमान्यं स्थिरीकुरु च सद्दर्शनप्रवचने।
एवं समीर्य कमलाक्षं विचिन्त्य गुरु मादिश्य यं स्वयमयात्
तं यामुनार्य मह मीडे सदावसथ माधूतवादिनिकरम्॥ १७॥

यथा गुरूक्तं कुरुकावलप्पन्
वशे स्थितं योगरहस्य माप्तुम्।
य स्तं समाधिस्थ मुपेत्य भीतो
विघ्नाच्च तूष्णीं स्थित आश्रये तम्॥ १८॥

श्रीनाथमुन्यन्वयज स्सुधीन्द्रः यः
कोप्युपायात इहास्ति वेति।
श्रुत्वा गिरं यश्च विसिष्मयेऽथ
ज्ञातं कथं न्वित्यवदत् तमीडे॥ १९॥

पद्मासेचनकांबुजाक्षिमधुरालोकैर्विकृष्टोप्यहो-
मा मानन्दिन मप्यपास्य कमलाकान्तोऽन्य मन्वैक्षत।



www.prapatti.com

वंश्यो नाथमुनेर्भवेदिति विदन् येनाथ संप्रार्थितः
भूयो यस्य समागमाय समयं चाऽहाश्रये तं गुरुम्॥ २० ॥

श्रीरङ्गेऽध्ययनोत्सवे शठरिपो स्सूक्तिं सुगीतां बुधैः
श्रुत्वानन्तपयोजनाभचरणाम्भोजैकसेवादरः।
गत्वाऽनन्तपुरं निजाभिलषितं संपूर्य तत्रोषितः
स्मृत्वा योगरहस्यवेदनदिनं खिन्न स्तमार्यं भजे॥ २१ ॥

काञ्चीमण्डलवासिनौ द्विजवरौ श्रीरङ्गमासेदतुः
नत्वा यं मुनिपं स्वदेशकुशलो अन्तं प्रसङ्गान्मुदा।
श्रीरामानुजवैभवं बहुमुखं चा वेदयामासतुः
श्रुत्वैतादृश मिष्टमेव फलितं मेने च य स्तं भजे॥ २२ ॥

शिष्यै स्साकं करिगिरिपतेर्मङ्गळाशासनं यः
कृत्वा रामावरजयमिनं प्रेक्ष्य दूराच्च तुष्टः।
देवं भूयोप्यनमदभयं प्रार्थयन् स्वेष्टसिद्ध्यै
रङ्गास्थाने निजमतपरीरक्षणार्थं भजे तम्॥ २३ ॥

श्रीराममिश्रगुरुराडुपदेशलब्ध-
गीतार्थसारसमुदीक्षणतो वितेने।
गीतार्थसङ्ग्रहसमाख्यकृतिं प्रशस्तां
य स्तत्त्वनिश्चयचणः प्रणमाम्यहं तम्॥ २४ ॥

प्रामाण्यमागमानां प्राज्ञंमन्यैर्विलोपितं जगति।
प्रामाण्य मागमीयं पुनरप्य स्थापि येन तं वन्दे॥ २५ ॥

पुरुरुषा पुरुषाः परुषोक्तिभिः पुरुषतत्त्वविवाद मकुर्वत।
पुरुषनिर्णयमाह तदा च यः तमुपयामि गुरुं मुनियामुनम्॥ २६ ॥

यदा लक्ष्मीतत्त्वे विविधकथका नैकमतयः
मिथो वादोन्मत्ता नयपथविदूरा स्समभवन्।
चतुश्श्लोक्या य स्तान् व्यजयत तदा निर्णयगिरा
सदा सेवे भक्त्या निखिलजननीं तं च यमिनम्॥ २७ ॥



www.prapatti.com

आत्मेश्वराद्ये प्रथिते च सिद्धी
संविन्मुखा सिद्धि रितीह तिस्रः।
तत्त्वप्रबोधाय हि यो व्यतानीत्
प्रणौमि तं यामुन मद्वितीयम्॥ २८॥

प्रत्नवाक्प्रयत्नलभ्य मुक्त्ययत्नदायिनं
तत्त्वसार मद्वितीय मत्युदारभावदम्।
स्तोत्ररत्ननामधेय मागमोक्तिभक्तिदम्
य श्चकार यामुनं त माश्रये कवीश्वरम्॥ २९॥

स्मारं स्मारं गुरुं स्वं प्रथितमतिमता मुत्तमं राममिश्रं
श्रीमद्रङ्गाधिनेतु स्सविध उपकृतं सर्वनिर्वाहशक्तम्।
श्रीमद्रामानुजं चायतियतितिलकं भावयन्नन्त्यकाले
आकुञ्च्यात्माङ्गुलीर्यः समदिश दखिलं तं भजे यामुनेयम्॥ ३०॥

श्रीमद्यामुनसंयमीन्द्रसुगुणालङ्कारविद्योतिनीं
एतां त्रिंशतमादराद्विरचितां ये कीर्तयन्त्यन्वहम्।
गोपालेन गुरूत्तमाङ्घ्रिकमलास्वादैकलोलेन ते
विद्वांस स्सकलाभिनन्द्यचरिता भान्त्यात्मभाग्याधिकाः॥ ३१॥

॥ इति श्रीयामुनमुनिस्तुतिः संपूर्णा॥



www.prapatti.com